# गुरु आराधना

श्री गणेशाय नमः

**श्री लक्ष्मीकान्ताय नमः ॥ श्री परमेश्वर्यै नमः ॥**

**अथाराधना प्रयोग लिख्यते ॥**

गुरु चतुष्टयस्य केशवादीनां च प्रत्येकमेकैक इत्येवं षोडष बाह्मणमभिप्रेत्योच्यते ॥ प्रातर्होमानंतर ब्रह्मीभूत स्वगुरोः समाराधनं करिष्येति संकल्पः ॥ गुरवर्थे भवद्भिः क्षणः कर्तव्यः ॥। एवम्परम गुर्वर्थे भवद्भिः क्षणः कर्तव्यः ॥ परमेष्ठी गुर्वर्थे भवद्भिः क्षणः कर्तव्यः ॥ परात्पर गुर्वर्थे भवद्भिः क्षणः कर्तव्यः ॥ यद्वा विश्वरूप धराचार्यर्थे भवद्भिः क्षणः कर्तव्यः ॥ ततो गुरू अयमीति चत्वारो ब्राह्मणान्निमंत्र्य मध्यान्हे विप्राय शुक्ले केशवार्थे भवद्भिः क्षणः कर्तव्यः ॥ कृष्णे संकषणार्थे भवद्भिः। इत्येवं षोडशं बाह्मणान्नि मंत्र्य मध्यान्हे विप्रानाहूय कर्त्ता शुचिराचम्य ॥ पवित्रपाणिः प्राणानायम्य देश कालौ स्मृत्वा श्री नारायण प्रीत्यर्थे ब्रह्मीभूत स्वगुरोः आराधनं करिष्ये ॥ इति संकल्पा ॥

गन्धा अक्षत तुलसी कर्पूर मिश्र जलेन बरेण क्रमेण तेषां पाद प्रक्षालनं कृत्वा तानाचम्य ॥ स्वयं चाचम्य पादप्रक्षालनोदकं पात्रान्तरे गृहीत्वा तत्पादौ साक्षत गन्धपुष्प तुलसीदलैरभ्यर्च्य आनन्द मानन्दकरं प्रसन्नं ज्ञान स्वरूपं निजबोधयुक्तम् ॥ योगीन्द्रमीज्यंभव रोग वैद्यं श्रीमद्गुरुन्नित्यमहन्नमामि ॥ इति नमस्कुर्यात् ॥ एवं सर्वेषां पूजां कृत्वा गन्धादिभिः तत्पात्रमलंकृत्य देवं सन्निधौ संस्थाप्य कुशासनेषु प्राङ्मुखान्वा उपवेश्य पुरुष सूक्तेन प्रत्य ऋचां ॥ ॐ नमो नारायणा येति मंत्र सहितेनावाहनादि षोडशोपचारैः पदार्थानु समयेनाभ्यर्चयेत्। यद्वा गन्धपुष्प धूपदीप आच्छादनान्त पूजा द्रष्टव्या ॥ ततः सर्वेषु पात्रेषु पायसादि विशिष्ट द्रव्यं साज्य व्यञ्जनसहितं च परिविष्टस्य गायत्र्या प्रोक्ष्य गुरवे इदमन्नं परिविष्ट परिवेक्ष्यमाणं च || आतृप्ते : स्वाहा हव्यन्न मम । एवं परम गुरवे इदमन्नं ॥ परमेष्ठी गुरवे इदंमन्नं परात्पर गुरवे इदंमन्नं विश्वरुप धराचार्याय वा आदौ ततो त्रयं गुरुं ततः केशवाय इदमन्नं ॥ कृष्णे संकर्षणाय इदमन्नं इति सर्वत्रान्नंत्यागं कृत्वा ॥ ॐ बह्मार्पणं देवता नैवेद्यं आपोरानं ॐ एको विष्णुः । ऊँ, तद्ब्रह्मा ॥ ॐ तद्वायुः । ॐ तदात्मा ॥ ॐ तत्सत्यं ॥ ॐ तत् सर्वं ॥ ॐ तत्पुरोर्नमः ॥ ॐ अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु । ॐ त्वं यज्ञस्त्वं वषट्कारस्त्वमिन्द्रस्त्व रुद्रस्त्वं विष्णुस्त्वं ब्रह्मत्वं प्रजापतिः ॥ त्वन्तदाप आपोज्योति रसोमृतं ब्रह्म भूर्भुवः स्वरोम् पञ्च प्राणाहुति' जपित्वा भोजनेषु उपविष्टेषु उपनिषन्मंत्रान् श्रावयेत् तृप्तेषु ॥ ऊं तद्ब्रह्मेत्यनुवाकं जपित्वा उत्तरापोशनोत्तरमाचान्तेषु विशिष्ट तांबूलं

दक्षिणावस्त्रादिभिरभ्यर्च्य: उपविष्टेष्वेव तेषु गुर्वाराधनांगभूतं तीर्थ पूजनं करिष्ये ॥ चतुरस्त्र मण्डले गोमयो पलिप्य तत्र रंगवल्यादिभिरलंकृत्य तन्मण्डले धान्यो परिपादोदकं कलशं स्थाप्य तत्र गंगादि सर्व तीर्थानि भावयित्वा पुरुष सूक्तेन प्रत्य ऋचं तीर्थराजाय नमयित्यं तेन षोडशोपचारै: अभ्यर्च्य।। तत्पात्रं शिरसि धृत्वा 'ॐ लोक: , सरस्वत्यायान्त्येष वै देवयानः पन्थास्तमेवान्वारोहन्त्या - क्रोशन्तोयान्त्यवर्ति मेवान्यस्मिन् प्रतिषज्य प्रतिष्ठांग गच्छन्ति यदा दश शतं कुर्वन्त्यथैकमुत्थानं शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठन्ति ॥ यदा शत सहस्रं कुर्वन्त्यथैकमुत्थानं सहस्र समितो वा असौ लोकोमुमेव लोकमभिजयन्ति यदा येषां प्रमीयेत तदा वाजीयेन्न रथैकमुत्थानं तद्वितीर्थं ॥ इत्यनुवाक शेष: ॥ भीषास्माद्वातः पवने भीषोदेति सूर्यः भीषास्माद् अग्निश्चेन्द्रश्च मृत्युर्धावति पंचम इति ॥ सैषानन्दस्य मीमांसा भवति ॥ युवास्यात्साधु युवाध्यापकः ॥ आशिष्टो दृढिष्टो बलिष्ठ: ॥ तस्येयं पृथिवी सर्व वित्तस्य पूर्णास्यात् ॥ स एको मानुष आनन्द: ते ये शतं मानुषा आनन्दा ॥ स एको मनुष्य गधर्वाणामानन्द: ॥ श्रोत्रियस्य चाकामहतस्य ते ये शतं मनुष्य गन्धर्वाणामानन्दाः स एको देव गन्धर्वाणामानन्दः ॥ स एक: पितृणां चिरलोकलोकानामानन्द: ।॥ श्रोत्रियस्य चाकामहतस्य ते ये शतं पितृणां चिरलोक लोकानामानन्दा: ॥ स एकः अजान जानां देवानामानन्द: ॥ श्रोत्रियस्य चाकामहतस्य ते ये शतमाजानां जानान् देवानामानन्दाः ॥ स एक: कर्म देवानां देवानामानन्द: ये कर्मणा देवानपियन्ति । श्रोत्रियस्य चाकामह तस्य ते ये शतं कर्मदेवानां देवानामानन्दा: ॥ स एको देवानामानन्द:॥ श्रोत्रियस्य चाकामहतस्य ते ये शतं देवानामानन्दाः ॥ स एकः इन्द्रस्यानन्दः ॥ श्रोत्रियस्य चाकामह तस्य ते ये शतं इन्द्रस्यानन्दा: ॥ स एको बृहस्पतेरानन्दः ॥ श्रोत्रियस्य चाकामह तस्य ते ये शतं वृहस्पतेरानन्दाः । स एकः प्रजापतेरानन्दः॥ श्रोत्रियस्य चाकामह तस्य ते ये शतं प्रजापतेरानन्दाः ॥ स एको ब्रह्मण आनन्दा: ॥ श्रोत्रियस्य चाकामहतस्य ते ये शतं ब्रह्मण: आनन्द: ॥ स यश्चायं पुरुषे ॥ यश्चा सावादित्ये । स एकः सय एवं वित् अस्माल्लोकात् प्रेत्या ॥ एतन्नमय - मात्मानमुपसंक्रामति ॥ एतं णमयमात्मानमुप संक्रामति ॥ एतं मनोमय - मात्मानमुप संक्रामति ॥ एवं विज्ञानमयमात्मानमुप संक्रामति ॥ एतमानन्दमय मात्मानमुप संक्रामति तदप्येष श्लोको भवति ॥यतोवाचो निवर्तते ॥ अप्राप्य मनसा सहा आनन्दं बह्मणो विद्वान् न विभेति कुलश्चनेति ॥ एतं हवावनतपति । किमहं साधुनाकरवम्| किमहं पापमकरवमिति ॥ सय एवं विद्वाने ते आत्मानं स्पृणुते ॥ उभेद्येवैष एते आत्मानं स्पृणुते ॥ य एवं वेद इत्युपनिषत् ॥ सहनाववतु सहनौ भुनक्तु सहवीर्यंकर वा वहै तेजस्विनावधीतमस्तु मा द्विषावहै ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ इत्यनुवाक जपित्वा ॥ हरिकीर्तनपुरः सरंस हर्ष नृत्यं च कृत्वा तत्पात्रं पुनर्मण्डले संस्थाप्य उत्तरपूजनं कृत्वा तीर्थ ग्रहणं तत्र मंत्रः ॥

**अविद्या मूल शमनं सर्व पाप प्रनाशनम् ॥ गुरोः पादोदकं चित्र संसार भय नाशनम् ॥ 1 ॥**

**शोषणं पाप पंकस्य दीपनं ज्ञान तेजसा । गुरो पादोदकं चित्रं पुत्रपौत्र प्रवर्धनम् ॥ 2 ॥**